# महाकालभैरवाष्टकम् अथवा तीक्ष्णदंष्ट्रकालभैरवाष्टकम्

{॥ महाकालभैरवाष्टकम् अथवा तीक्ष्णदंष्ट्रकालभैरवाष्टकम् ॥}

ॐ

यं यं यं यक्षरूपं दशदिशिविदितं भूमिकम्पायमानं

सं सं संहारमूर्तिं शिरमुकुटजटा शेखरंचन्द्रबिम्बम् ।

दं दं दं दीर्घकायं विक्रितनख मुखं चोर्ध्वरोमं करालं

पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ १॥

रं रं रं रक्तवर्णं, कटिकटिततनुं तीक्ष्णदंष्ट्राकरालं

घं घं घं घोष घोषं घ घ घ घ घटितं घर्झरं घोर नादम् ।

कं कं कं कालपाशं द्रुक् द्रुक् दृढितं ज्वालितं कामदाहं

तं तं तं दिव्यदेहं, प्रणामत सततं, भैरवं क्षेत्रपालम् ॥ २॥

लं लं लं लं वदनाथं ल ल ल ल ललितं दीर्घ जिह्वा करालं

धूं धूं धूं धूम्रवर्णं स्फुट विकटमुखं भास्करं भीमरूपम् ।

रुं रुं रुं रूण्डमालं, रवितं महिगतं ताम्रनेत्रं करालम्

नं नं नं नग्नभूषं , प्रणमत सततं, भैरवं क्षेत्रपालम् ॥ ३॥

वं वं वायुवेहं नतजन सदयं ब्रह्मसारं परमतं

खं खं खड्गहस्तं त्रिभुवनविलयं भास्करं भीमरूपम् ।

चं चं चलित्वाऽचल चल चलित चालितं भूमिचक्रं

मं मं मायि रूपं प्रणमत सततं भैरवं क्षेत्र पालम् ॥ ४॥

शं शं शं शङ्खहस्तं, शशिकरधवलं, मुख सम्पूर्ण तेजं
मं मं मं मं महान्तं, कुलमचुल कुलं मन्त्र गुप्तं सुनित्यम् ।
यं यं यं भूतनाथं, किलि किलि कलितं बालकेलि प्रदहानं
आं आं आं आन्तरिक्षं , प्रणमत सततं, भैरवं क्षेत्रपालम् ॥ ५॥

खं खं खं खड्गभेदं, विषममृतमयं काल कालं करालं
क्षं क्षं क्षं क्षेप्रवेगं, दह दह दहनं, तप्त सन्दीप्य मानम् ।
हौं हौं हौंकारनादं, प्रकटित गहनं गर्जितै भूमिकम्पं
वं वं वं वाललीलं, प्रणमत सततं, भैरवं क्षेत्रपालम् ॥ ६॥

सं सं सं सिद्धियोगं, सकलगुणमखं, देवदेवं प्रसन्नं
पं पं पं पद्मनाभं, हरिहरमयनं चन्द्रसूर्याग्नि नेत्रम् ।
ऐं ऐं ऐं ऐश्वर्यनाथं, सततभयहरं, पूर्वदेवस्वरूपं
रौं रौं रौं रौद्ररूपं, प्रणमत सततं, भैरवं क्षेत्रपालम् ॥ ७॥

हं हं हं हंसयानं, हसितकलहकं, मुक्तयोगात्त हासं, ?
धं धं धं नेत्ररूपं, शिरमुकुट जटाबन्ध बन्धाग्र हस्तम् ।
तं तं तंकानादं, त्रिदलसतलतं, कामगर्वापहारं, ??
भ्रुं भ्रुं भ्रुं भूतनाथं, प्रणमत सततं, भैरवं क्षेत्रपालम् ॥ ८॥

इति महाकालभैरवाष्टकं सम्पूर्णम् ।

नमो भूतनाथं नमो प्रेतनाथं

नमः कालकालं नमः रुद्रमालम् ।

नमः कालिकाप्रेमलोलं करालं

नमो भैरवं काशिकाक्षेत्रपालम् ॥

Proofread by Sunder Hattangari sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Maha Kalabhairava Ashtakam ( Teekshna Damstra Kalabhairava Ashtakam ) Lyrics in Devanagari PDF
% File name : mahAkAlabhairavAShTakam.itx
% Category : aShTaka
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Sunder Hattangari sunderh at hotmail.com
% Latest update : February 2, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website